# S-221090–B / S-221512–B

## विषय : संस्कृत

समय : 3 घण्टे ] [ पूर्णांक : 75

**निर्देश** : (*i*) सर्वे प्रश्नाः समाधेयाः।

(*ii*) सुन्दरं सुस्पष्टञ्च उत्तरं लिखत।

**प्रश्न–1** अधोलिखित श्लोकस्य हिन्दीभाषया अर्थं लिखत— [3]

"त्वक्शाखापत्रमूलैश्च पुष्पफलरसादिभिः।

प्रत्यङ्गैरुपकुर्वन्ति वृक्षाः सद्भिः समं सदा॥

**प्रश्न–2** अधोलिखितं श्लोकं पठित्वा प्रदत्त प्रश्नानाम् उत्तराणि लिखत— [1×3=3]

"अज्ञानेनावृत्तो लोकस्तमसा न प्रकाशते।

लोभात् त्यजति मित्राणि सङ्गात्स्वर्गं न गच्छति॥"

*प्रश्नाः*

(*i*) केन आवृत्तः लोकः (एकपदेन उत्तरत) ?

(*ii*) 'तमसा' इति पदस्य हिन्दीभाषया अर्थं लिखत।

(*iii*) 'संसार' इति पदस्य पर्यायपदं श्लोके प्रयुक्तम्।

**प्रश्न-3** अधोलिखित गद्यस्य हिन्दीभाषया अनुवादं कुरुत— [3]

"श्रुतिः—भातृवर! मम तु कन्ये पुत्रसमे एव स्तः। एका तु चिकित्साक्षेत्रे आयुर्वेदपाठ्यक्रमे अध्ययनं करोति। अपरा संस्कृत स्नातकोत्तर पाठ्यक्रमे पठति। आवां स्वस्थौ प्रसन्नौ स्व द्वे कन्यकेऽपि च। अस्माकं सदनं सानन्दम्।"

**प्रश्न-4** अधोलिखितं गद्यांशं पठित्वा निर्देशानुसारेण प्रदत्त प्रश्नानाम् उत्तराणि लिखत— [1×3=3]

"अरपायाः तटे एकः लघु ग्रामः आसीत्। परसू अरपानद्यां प्रतिदिनं मत्स्याखेटं करोतिस्म। कालान्तरेण तस्य भार्या बैसाखा एकां स्वस्थां बालाम् अजनयत्। सा बालिका लावण्यवती आसीत्। लावण्येन तस्याः 'बिलासा' इति नामकरणमभवत्।"

*प्रश्नाः*

(*i*) परसू प्रतिदिनं किं करोतिस्म? (एक पदेन उत्तरत)

(*ii*) 'नामकरणमभवत्' इते वाक्ये क्रियापदम् अस्ति।

(*iii*) गद्ये 'पत्नी' इति पदस्य पर्यायपदं प्रयुक्तम्।

**प्रश्न-5** अधोलिखितेषु चतुर्णां प्रश्नानामुत्तराणि हिन्दीभाषया लिखत— [1×4=4]

(*क*) मत्स्यपालनक्षेत्रे कः पुरस्कारः दीयते?

(*ख*) लाभानामुत्तमं किम्?

(*ग*) वृक्षाः प्राणिनां कथम् उपकुर्वन्ति?

(*घ*) कः न्यायाधीशः आसीत्?

(*ङ*) दीपमालिकापर्वणि कस्य शब्दः श्रुयते?

**प्रश्न-6** अधोलिखितेषु चतुर्णां प्रश्नानामुत्तराणि संस्कृतभाषया लिखत— [1×4=4]

(*क*) पुत्रं द्रष्टुं कः प्रस्थितः?

(*ख*) मङ्गलयानस्य मार्गः कतिधा परिवर्तितः?

(*ग*) कस्मात् पादम् आदत्ते?

(*घ*) केषां शोधकाः वृक्षाः?

(*ङ*) अस्माकं कर्तव्यं किम्?

प्रश्न-7 द्वादशवाक्येषु संस्कृतभाषया निबन्धलेखनं कुरुत (कोऽपि एकः)— [½×12=

(i) पर्यावरणम्

(ii) सदाचारः

(iii) सुभाषचन्द्रः

(iv) महाकविः कालिदासः

प्रश्न-8 अधः प्रदत्ते संख्ये संस्कृते लिखत— [1×2=2]

(क) 109 (ख) 150

प्रश्न-9 रेखाङ्कित शब्दयोः प्रकृति-प्रत्ययं पृथक् कुरुत— [1×2=2]

(क) मनुष्यः सत्येन <u>देवत्वम्</u> प्राप्नोति।

(ख) रविवासरे <u>साप्ताहिकः</u> अवकाशः भवति।

प्रश्न-10 रेखाङ्कित पदयोः सन्धिविच्छेदं कृत्वा नामानि लिखत— [1×2=2]

(क) नृपः <u>महद्दानं</u> कृतवान्।

(ख) सः <u>शीघ्रमुचलति</u>।

प्रश्न-11 अधोलिखित पदयोः उपसर्गं चित्वा लिखत— [1×2=2]

(क) अतिरिच्यते

(ख) उत्तिष्ठति

प्रश्न-12 समासविग्रहं कृत्वा नामानि लिखत— [1×3=3]

(क) त्रिभुवनम्

(ख) पितापुत्रौ

(ग) पतितपर्णम्

प्रश्न-13 अधोलिखित वाक्येषु वाच्यमवबुध्य नाम लिखत— [1×3=3]

(क) तेन अहं दृश्ये।

(ख) विद्याहीनैः न शुभ्यते।

(ग) रामः पुस्तकं पठति।

**प्रश्न-14** निर्देशानुसारेण लकार परिवर्तनं कृत्वा लिखत— [1×3=3]

(क) बालकाय मोदकं रोचते (लृट्लकार)।

(ख) स: लेखं लेखिष्यति (लट्लकार)।

(ग) ते मिलन्तु (लङ्लकार)।

**प्रश्न-15** स्वपाठ्यपुस्तकात् कौचित् द्वौ श्लोकौ लिखत यौ अस्मिन् प्रश्नपत्रेऽस्मिन् नागतौ स्याताम्। [2½×2=5]

**प्रश्न-16** स्वपाठ्यपुस्तकात् चतस्र: सूक्ती: लिखत या: प्रश्नपत्रेऽस्मिन् नागता: स्यु:। [1×4=4]

**प्रश्न-17** (अ) भवत्या नाम मनोरमा अस्ति। भवती स्वमातुलस्य परिणयोत्सवे ग्रामं गन्तुमिच्छति। अत: अवकाशाय प्राचार्यं प्रति संस्कृतभाषया प्रार्थनापत्रं लिखतु। [1+2+1=4]

***अथवा***

भवान् बस्तरनगरे स्थित: मयङ्क:। भवत: मित्रं नरेश: मनहरे बालोद नगरे वसति। तं परीक्षायां सफलतायै वर्धापनं-पत्रं कोष्ठक प्रदत्त पदानां सहायतया लिखत—

(प्रसन्नता, प्राप्स्यसि, नमस्ते, वर्धापनं, अत्रकुशलं, बालोदत:, सफलतां, अपश्यम्)

स्थानम् (*i*) --------

प्रिय मित्र नरेश: मनहरे दिनाङ्क: 07-11-2021

सप्रेम (*ii*) ---------

(*iii*) -------- तत्रास्तु। अद्यैव तव परिणाम: आगत:। तव (*iv*) -------- ज्ञात्वा मम मनसि महती (*v*) -------- जाता यदा अहं तव नाम योग्यता सूचौ (*vi*) --------। त्वया सप्तशतम् अङ्का: प्राप्ता:। त्वं निश्चितरूपेण (*vii*) --------। त्वया परिवारस्य विद्यालयस्य च नाम उज्ज्वलीकृतम्।

अस्याम् उज्ज्वल सफलतायाम् अहं तुभ्यं हार्दिकं (*viii*) -------- यच्छामि। उज्ज्वल भविष्याय च कामये। मातृपितृचरणेषु प्रणाम:।

तव अभिन्नहृदयं मित्रम्

मयङ्क:

(ब) अधोलिखितम् अपठितांशं पठित्वा निर्देशानुसारेण संस्कृतभाषया उत्तरत—

मातृभूमिः बहुविधैः द्रव्यैः अस्मान् उपकरोति। तस्यै अस्माकमपि कर्तव्यं यत् वयं कायेन, मनसा, वाचा, धनेन च स्वमातृभूमेः उन्नतिं कुर्याम। देशाय अस्माकं देशवासिनां हृदयेषु प्रेम भवेत्। मातृभूमिं प्रति सम्मानं भवेत् अतएव कथितम्—''जननी जन्मभूमिश्च स्वर्गादपि गरीयसी।''

*प्रश्नाः* [1×2=2]

(क) एकपदेन उत्तरत—

(*i*) का अस्मान् उपकरोति ?

(*ii*) मातृभूमिं प्रति किं भवेत् ?

(ख) पूर्णवाक्येन उत्तरत— [2]

(*i*) मातृभूम्यै अस्माकं किं कर्तव्यम् अस्ति ?

***अथवा***

गद्यांशस्य सारांशं संस्कृतभाषया लिखत।

प्रश्न–18 (अ) उचितं विकल्पं चित्वा लिखत— [1×5=5]

(*i*) जागीरं बिलासायै दत्तवान्—

(*क*) कल्याणसायः

(*ख*) सुरेन्दसायः

(*ग*) मोहनसायः

(*घ*) गजेन्द्रसायः

(*ii*) 'वालकाः इदानीं क्रीडाक्षेत्रे' क्रीडन्ति।

अव्ययपदं वर्तते—

(*क*) बालकाः

(*ख*) क्रीडाक्षेत्रे

(*ग*) इदानीं

(*घ*) क्रीडन्ति

(*iii*) स्वकीये प्रथमप्रयासे मङ्गलग्रहं प्रति यानप्रेषणे सफलताम् अलभत्—

(क) अमेरिका

(ख) भारत:

(ग) सोवियतरूस:

(घ) यूरोपसंघ:

(*iv*) 'सुबन्त:' इति पदस्य सन्धिविच्छेदो अस्ति—

(क) सु + बन्त:

(ख) सुप् + अन्त:

(ग) सुब् + अन्त:

(घ) सुप + न्त:

(*v*) 'नम:' योगे विभक्ति: भवति—

(क) प्रथमा

(ख) तृतीया

(ग) चतुर्थी

(घ) षष्ठी

(ब) उचितं विकल्पं चित्वा रिक्तस्थानानि पूरयत— [1×5=5]

(सप्तमी, पय:, ठक्, सन्त:, उच्चै:)

(*i*) सन्ति —— कियन्त:।

(*ii*) सभायां —— मा वद।

(*iii*) निशान्ते च पिबेत् —— ।

(*iv*) 'सखायाम्' इति पदे —— विभक्ति: अस्ति।

(*v*) 'माङ्गलिक:' इत्यस्मिन् पदे —— अस्ति।

(स) सुमेलनं कुरुत— [1×5=5]

| (क) | | (ख) |
|---|---|---|
| (i) वृक्षाः | – | धीयते |
| (ii) 'भी (भय)' योगे | – | स्वमेधया |
| (iii) अभि | – | तृतीया विभक्तिः |
| (iv) शिशुना | – | रोगाणामपहारकाः |
| (v) पादं शिष्यः | – | पञ्चमी विभक्तिः |

———